# संस्कृत वार्ता:

दिनाङ्क : 12/09/2026 सायम् - 06:20

आदौ मुख्यवार्ता:

ब्रिक्स्-शिखर-सम्मेलनस्य प्रथम-दिवसे सर्वसम्मत्या 'नवदेहली-घोषणापत्रम्' अङ्गीकृतम्; घोषणापत्रस्य अङ्गीकारः सदस्य-राष्ट्राणां समन्वितानां सङ्कल्पानां कृते स्पष्ट-मार्गदर्शकः इति प्रधानमन्त्री नरेन्द्र मोदी।

प्रधानमन्त्रिणा मोदिना मलेशिया-वियतनाम-इथियोपिया-प्रधानमन्त्रिभिः तथा अबू धाबी-युवराजेन सह द्विपक्षीय-वार्ताः सञ्चालिताः; अद्य सायं चीन-राष्ट्रपतिना षी-चिनफिङ्ग-वर्येण सह सम्भाषणं विधीयते ।

षड्-वर्षीय-स्थगनं समापयता चीन-देशेन अस्य मासस्य एकविंशति-दिनाङ्कात् ग्वाङ्झोउ-नवदेहली-मध्ये नियमित-यात्री-विमान-सेवाः पुनः प्रारप्स्यन्ते।

महिला-हॉकी-क्रीडायां चीनस्य मोकी-नगरे आयोजितायां कनिष्ठ-एशिया-चषक-स्पर्धायां दक्षिण-कोरिया-देशं पंच एकम् इति अङ्कैः पराभूय भारतं अन्तिम-चरणं प्राविशत्।

अथ वार्ता: विस्तरेण

ब्रिक्स-शिखरसम्मेलनम्

अद्य नवदेहल्यां अष्टादश-ब्रिक्स्-शिखर-सम्मेलने प्रधानमन्त्री नरेन्द्र मोदी इथियोपिया, मलेशिया, वियतनाम इत्येतेषां देशानाम् प्रधानमन्त्रिभिः अथ अबू धाबिनः युवराजेन सह द्विपक्षीय-गोष्ठीनां शृङ्खलाम् प्रारब्धवान्। कूटनीतिक-वार्तानाम् अस्याम् आवृतौ प्रधानमन्त्रिणा सर्वप्रथमम् इथियोपिया-देशस्य प्रधानमन्त्रिणा डा. आबी-अहमद-अलीसन्निधेन सह उच्च-स्तरीय-सम्भाषणं विहितम्। विदेश-मन्त्रालयेन विज्ञप्तौ संसूचितं यत् उभौ नेतारौ द्वयोः देशयोः 'विशेष-रणनैतिक-संधिं नूतनाम् औन्नतिं नेतुम् सङ्कल्पं गृहीतवन्तौ। गोष्ठ्यां मुख्यतया आर्थिक-सहयोगस्य, रक्षा-सुरक्षा-सम्बन्धानाम् तथा क्षमता-संवर्धनस्य क्षेत्रेषु प्रगतेः समीक्षणं कृतम्। एषा महती सम्पूर्तिः गत-वर्षस्य दिसम्बर मासे असिस-अबाबा-नगरे प्रधानमन्त्रिणः मोदिनः ऐतिहासिक-प्रवासस्य परिणाम-रूपेण संजाता। भारतस्य अध्यक्षतायां नवदेहल्यां समायोक्ष्यमाणस्य अष्टादश-ब्रिक्स्-शिखर-सम्मेलनस्य अवसर-अन्तराले प्रधानमन्त्री नरेन्द्र मोदी मलेशिया-देशस्य प्रधानमन्त्रिणा अनवर-इब्राहिम-इत्यमुना सह उच्च-स्तरीय-द्विपक्षीय-वार्ता

सञ्चालितवान्। अस्यां गोष्ठ्यां द्वयोः देशयोः नेतारौ व्यापार-निवेश-रक्षा-सुरक्षा-तथा जनात्-जन-सम्पर्कः इत्येतेषु बहुविध-क्षेत्रेषु द्विपक्षीय-सहयोगस्य प्रगतेः समीक्षणम् अकुरूताम्। उभौ नेतारौ अस्मिन् वर्षे प्रधानमन्त्रिणः मोदिनः मलेशिया-प्रवासस्य सङ्कल्पानां निष्पत्तेः अपि सूचनां गृहीतवन्तौ। प्रधानमन्त्रिणा मोदिना आसियान-भारत-सम्बन्धानां सुदृढीकरणे तथा क्षेत्रीय-सहयोगे मलेशिया-देशस्य निरन्तर-समर्थनस्य भूरिशः प्रशंसा कृता।

अत्रावधेयं यत् प्रधानमन्त्री नरेन्द्र मोदी वियतनाम-देशस्य प्रधानमन्त्रिणा ले-मिन्ह-हुङ्ग-इत्यनेन सह उच्च-स्तरीय-द्विपक्षीय-वार्तां कृतवान्। अस्यां गोष्ठ्यां ब्रिक्स्-सम्मेलने वियतनामस्य 'सहभागी-देशत्वेन सहभागिता सविशेषं स्वागतीकृता। विदेश-मन्त्रालयेन संसूचितं यत् अस्मिन् वर्षे वियतनाम-राष्ट्रपतेः तो-लम्-वर्यस्य भारत-प्रवास-वेलायाम् उच्च-स्तरे समुन्नीतायाः 'संवर्धित-व्यापक-रणनैतिक-संधेः प्रगतेः समीक्षणम् अस्मिन् उपवेशने विहितम्। अनेन सहैव प्रधानमन्त्रिणा अबू धाबिनः युवराजेन शेख्-खालिद-बिन्-मोहम्मद-बिन्-जायद-अल्-नहयान इत्यनेन सह द्विपक्षीय-सम्बन्धाः समीक्षिताः। उभौ पक्षौ राजनीतिक-सांस्कृतिक-वाणिज्यिक-ऊर्जा-क्षेत्रेषु तथा जनात्-जन-सम्पर्के आधारितस्य भारत-यू.ए.ई.-व्यापक-रणनैतिक-सहयोगस्य पुनरुच्चारणं चक्रतुः। अद्य सायमन्तराले प्रधानमन्त्री नरेन्द्र मोदी चीन-देशस्य राष्ट्रपतिना शी-चिनफिङ्ग इत्यमुना सहापि द्विपक्षीय-वार्तां विधास्यति।

विरामः

संस्कृतवार्तायाः संस्करणमिदम् इदानीम् आकाशवाणीतः प्रसार्यते। सममेव अयं कार्यक्रमः आकाशवाण्याः अन्तर्जालपटले www.newsonair.gov.in इत्यत्र, अथ newsonair चलदूरभाषीय- तन्त्रांशे अपि उपलब्धो भविष्यति।

ब्रिक्स घोषणापत्रम

नवदेहल्याः ऐतिहासिक-भारत-मण्डपे आयोज्यमानस्य अष्टादश-ब्रिक्स्-शिखर-सम्मेलनस्य प्रथम-दिवसे एव सदस्य-देशैः सर्वसम्मत्या 'नवदेहली-घोषणापत्रम् अङ्गीकृतम्। सत्रस्यास्य समापने प्रधानमन्त्री नरेन्द्र मोदी अस्य घोषणापत्रस्य स्वीकाराय प्रस्तावम् उपस्थापितवान्, यं सर्वे नेतारः एकस्वरेण सर्वसम्मत्या च अङ्गीकृतवन्तः। स्वकीये समापन-उद्बोधने प्रधानमन्त्रिणा मोदिना संसूचितं यत् अद्य अङ्गीकृतं नवदेहली-घोषणापत्रं ब्रिक्स्-सदस्य-देशानां संधि-सङ्कल्पानां कृते एकां स्पष्टां कूटनीतिकदिशम् अङ्कयति। तेन विशेषतः प्रतिपादितं यत् एतेषां सर्वसम्मत-सङ्कल्पानां प्रत्यक्ष-मूर्त-परिणामेषु परिवर्तनम् इदानीं सर्वेषां सदस्य-राष्ट्राणाम् उत्तरदायित्वं वर्तते।

प्रधानमन्त्रिणा नरेन्द्र-मोदिना सबलं प्रोक्तं यत् अद्यतनेन विचार-विनिमयेन एतत् स्पष्टं भवति यत् परिवर्तनशीलस्य विश्वस्य मार्गदर्शनं पुरातनैः अप्रासंगिकैश्च संस्थानैः विधातुं न शक्यते। तेन प्रतिनिधित्वे, संवेदनशीलतायां, नियम-निर्माण-प्रक्रियासु च आधारभूत-परिष्काराणां महती आवश्यकता प्रतिपादिता। प्रधानमन्त्रिणा संसूचितं यत् ब्रिक्स्-नेतृभिः भावि-प्रौद्योगिकीनां विकासे तथा तासां नियमन-विधानेषु 'ग्लोबल-साउथ' देशानां समाना सहभागिता भवेत् इत्यस्यां नीतौ विशेषः बलः दत्तः। तेन प्रतिपादितं यत् निर्णयानां तेषां निष्पत्तीनाञ्च मध्ये विद्यमानम् अन्तरालं केवलं सामूहिक-कार्यप्रणालीभ्यां समापयितुं शक्यते। भाषणस्य अन्ते प्रधानमन्त्रिणा ब्रिक्स्-अध्यक्ष-रूपेण सर्वेषां राष्ट्राध्यक्षाणां रचनात्मक-योगदानाय, निष्ठापूर्ण-सहयोगाय च हृदयेन कृतज्ञता प्रकटीकृता।

ब्रिक्स्-मञ्चस्य स्थापनायाः विंशति-वर्षपूर्तिम् स्मरणीयां विधातुम् अस्मिन् मञ्चे सदस्य-देशानां नेतृभिः द्वे स्मारक-डाक-चिटिके आधिकारिक-रूपेण विमोचिते। नवदेहल्याः भारत-मण्डपे आयोज्यमानस्य अस्य शिखर-सम्मेलनस्य 'समावेशी-वैश्विक-शासनं बहुपक्षवादस्य दृढीकरणञ्च' इति विषयक-सत्रे स्वकीये उद्घाटन-उद्बोधने प्रधानमन्त्री नरेन्द्र मोदी 'ब्रिक्स्-निरन्तरता-क्रियान्वयन-प्रणाल्याः' एकं क्रान्तियुतं प्रस्तावम् उपस्थापितवान्। मोदिना संसूचितं यत् प्रतिवर्षम् अध्यक्षतायाः परिवर्तने सत्यपि सङ्घस्य संस्थागत-गतिशीलता यथा-पूर्वं तिष्ठेत्, तदर्थं ट्रोइका-प्रणाल्याः माध्यमेन सर्वेषां सङ्कल्पानां निष्पत्तीनाञ्च निरन्तरं पुनरीक्षणं विधास्यते। प्रधानमन्त्रिणा मोदिना बलपूर्वकं प्रोक्तं यत् ब्रिक्स्-देशैः आगामी-विंशति-वर्षाणां कृते एका नूतना, सुदृढा, महत्त्वाकांक्षी च कार्यसूची रचयितव्या, यस्याः आरम्भः सङ्घस्य स्वकीयात् कार्य-प्रणाली-परिवर्तनात् एव भवितुमर्हति।

प्रधानमन्त्री कठिनसमये साहाय्यं सुकरं कर्तुं सम्बद्धदेशानां समुद्रीयप्राधिकारिणः कूटनीतिक-लक्ष्यं च योजयितुं सीफ़ेयरर्स् आपत्कालीन-समर्थनजालस्य स्थापनायाः प्रस्तावम् अपि अकरोत्। श्रीमोदी अवदत् यत् वैश्विकव्यापारे नाविकानां महतीं योगदानं भवति, तथापि कष्टकाले ते प्रायः स्वसमर्थनस्य अभावं अनुभवन्ति।

प्रधानमन्त्री अवदत् यत्, ब्रिक्स्-देशानां मध्ये ऐक्यं सर्वसम्मतं च वैश्विक-मञ्चे दृढ-परिणामेषु परिवर्तयितुं समयः आगतः। ब्रिक्स्-सदस्यराष्ट्राणि परस्परं सम्मानं कुर्वन्ति सर्वसम्मत्या अग्रे गच्छन्ति इति सः अवधानं दत्तवान्। सः अवदत् यत् समूहः कस्यापि विरुद्धं कार्यं न करोति, अपितु सर्वान् सङ्गृह्य एव अग्रे गच्छन् अस्ति। अस्मिन् वर्षे ब्रिक्स्-शिखरसम्मेलनम् ऐतिहासिकं सोपानम् इति प्रधानमन्त्रिणा वर्णितम्, अस्मिन् वर्षे समूहः स्वस्य विंशतितमं वार्षिकोत्सवम् आचरति इति सः सूचितवान्। सः अवदत् यत्, ब्रिक्स्-सङ्घः स्वस्य परिपक्वतावधौ अस्ति तथा विगतदशकद्वये वैश्विकस्तरे स्वस्य विशिष्टं परिचयम् अस्थापयत्। श्रीमोदी अवदत् यत् भारतस्य ब्रिक्स् इत्यस्य अध्यक्षता जनकेन्द्रितं, मानवता-प्रथमम् इति समीकरणे आधारितम् अस्ति। तेनोदीरितं यत् स्थितिस्थापकता, नवान्वेषणम्, सहकारः, सुस्थिरता च अध्यक्षत्वेन भारतस्य प्रमुखप्राथमिकताः सन्ति। एताषां प्राथमिकतानां मार्गदर्शनेन, भारतं ब्रिक्स्-सहकारं

सामान्यजनैः सह प्रत्यक्षतया योजयितुं विशिष्टावधानं प्रददाति। अनया दृष्ट्या सार्द्ध त्रि शततोप्यधिकाः सभाः आयोजिताः, तथा देशस्य प्रायः त्रिंशन्नगरेषु प्रतिनिधिमण्डलानां स्वागतस्य सौभाग्यम् भारताय प्राप्तम् इति प्रधानमन्त्री अवोचत्। संयुक्तराष्ट्रसङ्घस्य सुरक्षापरिषदि (यू. एन्. एस्. सी.) इत्यस्मिन् परिष्कारविषये प्रधानमन्त्रिणा अवधानं दत्तं यत् यू. एन्. एस्. सी. इत्यस्य परिष्कारे इतोऽपि विलम्बं कर्तुं न शक्यते तथा अस्मिन् विषये वार्तालापः निश्चित-कालपरिधिं, स्पष्ट-परिणामैः च सम्बद्धं भवेदिति। ततः पूर्वं, प्रधानमन्त्रिणा नरेन्द्रमोदिना शिखरसम्मेलनाय भारतमण्डपे आगमनावधौ ब्रिक्स् सदस्यराष्ट्राणां नेतृणां स्वागतं कृतम्।

चाईना-सदर्न्-एयरलाईन्स्

चाईना-सदर्न्-एयरलाईन्स् इत्यनेन अद्य उक्तं यत् ते अस्मिन् मासे एकविंशति दिनाङ्कात् ग्वाङ्झौ-नवदेहली-नगरयोः मध्ये नियमित-यात्री-विमानयानानि पुनः आरभ्य षट्वर्षाणां स्थगनं समाप्यते। विंशत्यधिक द्विसहस्रतमे वर्षे कोविड्-19 महामार्याः आरम्भात् अनन्तरं भारत-चीनदेशयोः मध्ये विमानसेवाः स्थगिताः आसन्। चीनदेशस्य राष्ट्रपतिः षी चिनफिङ्ग् इत्येषः ब्रिक्स्-शिखरसम्मेलने भागं ग्रहणाय भारतम् आगत्य प्रधानमन्त्रिणा नरेन्द्रमोदिना सह वार्तालापं कुर्वन् अस्ति।

हॉकी

महिला-हॉकी-क्रीडायां चीनस्य मोकी-नगरे आयोजितायां कनिष्ठ-एशिया-चषक-स्पर्धायां दक्षिण-कोरिया-देशं पंच एकम् इति अङ्कैः पराभूय भारतं अन्तिम-चरणं प्राविशत्।

।। इति वार्ताः ।।